श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
ओं नमो भगवते वासुदेवाय

महर्षि वेदव्यासप्रणीतं श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे चतुर्दशोऽध्यायः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

ओं नमो भगवते वासुदेवाय

# श्रीमद्भागवतमहापुराणम्

# ॥ पञ्चमस्कन्धे चतुर्दशोऽध्यायः ॥

स होवाच

य एष देहात्ममानिनां सत्त्वादिगुणविशेष -
विकल्पितकुशलाकुशलसमवहारविनिर्मितविविध -
देहावलिभिर्वियोगसंयोगाद्यनादिसंसारानु -
भवस्य द्वारभूतेन षडिन्द्रियवर्गेण तस्मिन्
दुर्गाध्ववदसुगमेऽध्वन्यापतित ईश्वरस्य भगवतो
विष्णोर्वशवर्तिन्या मायया जीवलोकोऽयं यथा
वणिक्सार्थोऽर्थपरः स्वदेहनिष्पादितकर्मानुभवः
श्मशानवदशिवतमायां संसाराटव्यां गतो नाद्यापि
विफलबहुप्रतियोगेहस्तत्तापोपशमनीं हरिगुरु -
चरणारविन्दमधुकरानुपदवीमवरुन्धे यस्यामु ह
वा एते षडिन्द्रियनामानः कर्मणा दस्यव एव ते ॥ **1** ॥

तद्यथा पुरुषस्य धनं यत्किञ्चिद्धर्मौपयिकं
बहु कृच्छ्राधिगतं साक्षात्परमपुरुषाराधन -
लक्षणो योऽसौ धर्मस्तं तु साम्पराय उदाहरन्ति।
तद्धर्म्यं धनं दर्शनस्पर्शनश्रवणास्वादनाव -
घ्राणसङ्कल्पव्यवसायगृहग्राम्योपभोगेन
कुनाथस्याजितात्मनो यथा सार्थस्य विलुम्पन्ति ॥ **2** ॥

अथ च यत्र कौटुम्बिका दारापत्यादयो नाम्ना कर्मणा वृकसृगाला एवानिच्छतोऽपि कदर्यस्य कुटुम्बिन उरणकवत्संरक्ष्यमाणं मिषतोऽपि हरन्ति ॥ 3 ॥

यथा ह्यनुवत्सरं कृष्यमाणमप्यदग्धबीजं क्षेत्रं पुनरेवावपनकाले गुल्मतृणवीरुद्भिर्गह्वरमिव भवत्येवमेव गृहाश्रमः कर्मक्षेत्रं यस्मिन् न हि कर्माण्युत्सीदन्ति यदयं कामकरण्ड एष आवसथः ॥ 4 ॥

तत्र गतो दंशमशकसमापसदैर्मनुजैः शलभ - शकुन्ततस्करमूषकादिभिरुपरुध्यमानबहिःप्राणः क्वचित्परिवर्तमानोऽस्मिन्नध्वन्यविद्याकामकर्मभि - रुपरक्तमनसानुपपन्नार्थं नरलोकं गन्धर्व - नगरमुपपन्नमिति मिथ्यादृष्टिरनुपश्यति ॥ 5 ॥

तत्र च क्वचिदातपोदकनिभान् विषयानुपधावति पानभोजनव्यवायादिव्यसनलोलुपः ॥ 6 ॥

क्वचिच्चाशेषदोषनिषदनं पुरीषविशेषं तद्वर्णगुणनिर्मितमतिः सुवर्णमुपादित्सत्यग्नि - कामकातर इवोल्मुकपिशाचम् ॥ 7 ॥

अथ कदाचिन्निवासपानीयद्रविणाद्यनेकात्मो - पजीवनाभिनिवेश एतस्यां संसाराटव्यामितस्ततः परिधावति ॥ 8 ॥

क्वचिच्च वात्यौपम्यया प्रमदयाऽऽरोहमारोपित - स्तत्कालरजसा रजनीभूत इवासाधुमर्यादो

रजस्वलाक्षोऽपि दिग्देवता अतिरजस्वलमतिर्न
विजानाति ॥ 9 ॥

क्वचित्सकृदवगतविषयवैतथ्यः स्वयं
पराभिध्यानेन विभ्रंशितस्मृतिस्तयैव
मरीचितोयप्रायांस्तानेवाभिधावति ॥ 10 ॥

क्वचिदुलूकझिल्लीस्वनवदतिपरुषरभसाटोपं
प्रत्यक्षं परोक्षं वा रिपुराजकुलनिर्भर्त्सितेना -
तिव्यथितकर्णमूलहृदयः ॥ 11 ॥

स यदा दुग्धपूर्वसुकृतस्तदा कारस्करकाकतुण्डा -
द्यपुण्यद्रुमलताविषोदपानवदुभयार्थशून्य -
द्रविणाञ्जीवन्मृतान् स्वयं जीवन् म्रियमाण
उपधावति ॥ 12 ॥

एकदासत्प्रसङ्गान्निकृतमतिर्व्युदकस्रोतः स्खलनव -
दुभयतोऽपि दुःखदं पाखण्डमभियाति ॥ 13 ॥

यदा तु परबाधयान्ध आत्मने नोपनमति तदा हि
पितृपुत्रबर्हिष्मतः पितृपुत्रान् वा स खलु
भक्षयति ॥ 14 ॥

क्वचिदासाद्य गृहं दाववत्प्रियार्थविधुरम -
सुखोदर्कं शोकाग्निना दह्यमानो भृशं
निर्वेदमुपगच्छति ॥ 15 ॥

क्वचित्कालविषमितराजकुलरक्षसापहृतप्रियतम -
धनासुः प्रमृतक इव विगतजीवलक्षण आस्ते ॥ 16 ॥

कदाचिन्मनोरथोपगतपितृपितामहाद्यसत्सदिति
स्वप्ननिर्वृतिलक्षणमनुभवति ॥ **17** ॥

क्वचिद्गृहाश्रमकर्मचोदनातिभरगिरि -
मारुरुक्षमाणो लोकव्यसनकर्षितमनाः
कण्टकशर्कराक्षेत्रं प्रविशन्निव सीदति ॥ **18** ॥

क्वचिच्च दुःसहेन कायाभ्यन्तरवह्निना गृहीतसारः
स्वकुटुम्बाय क्रुध्यति ॥ **19** ॥

स एव पुनर्निद्राजगरगृहीतोऽन्धे तमसि मग्नः
शून्यारण्य इव शेते नान्यत्किञ्चन वेद शव
इवापविद्धः ॥ **20** ॥

कदाचिद्भग्नमानदंष्ट्रो दुर्जनदन्दशूकैरलब्ध -
निद्राक्षणो व्यथितहृदयेनानुक्षीयमाणविज्ञा -
नोऽन्धकूपेऽन्धवत्पतति ॥ **21** ॥

कर्हि स्म चित्काममधुलवान् विचिन्वन् यदा
परदारपरद्रव्याण्यवरुन्धानो राज्ञा स्वामिभिर्वा
निहतः पतत्यपारे निरये ॥ **22** ॥

अथ च तस्मादुभयथापि हि कर्मास्मिन्नात्मनः
संसारावपनमुदाहरन्ति ॥ **23** ॥

मुक्तस्ततो यदि बन्धाद्देवदत्त उपाच्छिनत्ति
तस्मादपि विष्णुमित्र इत्यनवस्थितिः ॥ **24** ॥

क्वचिच्च शीतवाताद्यनेकाधिदैविकभौतिका -
त्मीयानां दशानां प्रतिनिवारणेऽकल्पो
दुरन्तचिन्तया विषण्ण आस्ते ॥ 25 ॥

क्वचिन्मिथो व्यवहरन् यत्किञ्चिद्धनमन्येभ्यो
वा काकिणिकामात्रमप्यपहरन् यत्किञ्चिद्वा
विद्वेषमेति वित्तशाठ्यात् ॥ 26 ॥

अध्वन्यमुष्मिन्निम उपसर्गास्तथा सुखदुःख -
रागद्वेषभयाभिमानप्रमादोन्मादशोकमोहलोभ -
मात्सर्येर्ष्यावमानक्षुत्पिपासाधिव्याधिजन्म -
जरामरणादयः ॥ 27 ॥

क्वापि देवमायया स्त्रिया भुजलतोपगूढः प्रस्कन्न -
विवेकविज्ञानो यद्विहारगृहारम्भाकुलहृदय -
स्तदाश्रयावसक्तसुतदुहितृकलत्रभाषितावलोक -
विचेष्टितापहृतहृदय आत्मानमजितात्मापारेऽन्धे
तमसि प्रहिणोति ॥ 28 ॥

कदाचिदीश्वरस्य भगवतो विष्णोश्चक्रात्परमाण्वादि
द्विपरार्धापवर्गकालोपलक्षणात्परिवर्तितेन वयसा
रंहसा हरत आब्रह्मतृणस्तम्बादीनां भूताना -
मनिमिषतो मिषतां वित्रस्तहृदयस्तमेवेश्वरं
कालचक्रनिजायुधं साक्षाद्भगवन्तं यज्ञपुरुषमना -
दृत्य पाखण्डदेवताः कङ्कगृध्रबकवटप्राया
आर्यसमयपरिहृताः साङ्केत्येनाभिधत्ते ॥ 29 ॥

यदा पाखण्डिभिरात्मवञ्चितैस्तैरुरुवञ्चितो
ब्रह्मकुलं समावसंस्तेषां शीलमुपनयनादि

श्रौतस्मार्तकर्मानुष्ठानेन भगवतो यज्ञ -
पुरुषस्याराधनमेव तदरोचयन् शूद्रकुलं भजते
निगमाचारेऽशुद्धितो यस्य मिथुनीभावः कुटुम्बभरणं
यथा वानरजातेः ॥ **30** ॥

तत्रापि निरवरोधः स्वैरेण विहरन्नतिकृपणबुद्धि -
रन्योन्यमुखनिरीक्षणादिना ग्राम्यकर्मणैव
विस्मृतकालावधिः ॥ **31** ॥

क्वचिद्द्रुमवदैहिकार्थेषु गृहेषु रंस्यन् यथा
वानरः सुतदारवत्सलो व्यवायक्षणः ॥ **32** ॥

एवमध्वन्यवरुन्धानो मृत्युगजभयात्तमसि
गिरिकन्दरप्राये ॥ **33** ॥

क्वचिच्छीतवाताद्यनेकदैविकभौतिकात्मीयानां
दुःखानां प्रतिनिवारणेऽकल्पो दुरन्तविषयविषण्ण
आस्ते ॥ **34** ॥

क्वचिन्मिथो व्यवहरन् यत्किञ्चिद्धनमुपयाति
वित्तशाठ्येन ॥ **35** ॥

क्वचित्क्षीणधनः शय्यासनाशनाद्युपभोगविहीनो
यावदप्रतिलब्धमनोरथोपगतादानेऽवसितमति -
स्ततस्ततोऽवमानादीनि जनादभिलभते ॥ **36** ॥

एवं वित्तव्यतिषङ्गविवृद्धवैरानुबन्धोऽपि
पूर्ववासनया मिथ उद्वहत्यथापवहति ॥ **37** ॥

एतस्मिन् संसाराध्वनि नानाक्लेशोपसर्गबाधित
आपन्नविपन्नो यत्र यस्तमु ह वावेतरस्तत्र
विसृज्य जातं जातमुपादाय शोचन्मुह्यन्बिभ्य -
द्विवदन् क्रन्दन् संहृष्यन् गायन्नह्यमानः
साधुवर्जितो नैवावर्ततेऽद्यापि यत आरब्ध
एष नरलोकसार्थो यमध्वनः पारमुपदिशन्ति ॥ **38** ॥

यदिदं योगानुशासनं न वा एतदवरुन्धते
यन्न्यस्तदण्डा मुनय उपशमशीला उपरतात्मानः
समवगच्छन्ति ॥ **39** ॥

यदपि दिगिभजयिनो यज्विनो ये वै राजर्षयः किं तु
परं मृधे शयीरन्नस्यामेव ममेयमिति कृतवैरानु -
बन्धायां विसृज्य स्वयमुपसंहृताः ॥ **40** ॥

कर्मवल्लीमवलम्ब्य तत आपदः कथञ्चिन्नरकाद्विमुक्तः
पुनरप्येवं संसाराध्वनि वर्तमानो नरलोकसार्थ -
मुपयाति एवमुपरिगतोऽपि ॥ **41** ॥

तस्येदमुपगायन्ति —
आर्षभस्येह राजर्षेर्मनसापि महात्मनः।
नानुवर्त्मार्हति नृपो मक्षिकेव गरुत्मतः ॥ **42** ॥

यो दुस्त्यजान् दारसुतान् सुहृद्राज्यं
हृदिस्पृशः।
जहौ युवैव मलवदुत्तमश्लोकओनेः ॥ **43** ॥

यो दुस्त्यजान् क्षितिसुतस्वजनार्थदारान्
प्रार्थ्यां श्रियं सुरवरैः सदयावलोकाम्।

नैच्छन्नृपस्तदुचितं महतां मधुद्विट्
सेवानुरक्तमनसामभवोऽपि फल्गुः ॥ **44** ॥

यज्ञाय धर्मपतये विधिनैपुणाय
योगाय साङ्ख्यशिरसे प्रकृतीश्वराय।
नारायणाय हरये नम इत्युदारं
हास्यन् मृगत्वमपि यः समुदाजहार ॥ **45** ॥

य इदं भागवतसभाजितावदातगुणकर्मणो
राजर्षेर्भरतस्यानुचरितं स्वस्त्ययनमायुष्यं
धन्यं यशस्यं स्वर्ग्यापवर्ग्यं वानुशृणो -
त्याख्यास्यत्यभिनन्दति च सर्वा एवाशिष
आत्मन आशास्ते न काञ्चन परत इति ॥ **46** ॥

॥ इति श्रीमद्भागवते महापुराणे पारमहंस्यां संहितायां
पञ्चमस्कन्धे भरतोपाख्याने पारोक्ष्यविवरणं नाम चतुर्दशोऽध्यायः ॥